DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

SANSKRIT: THE TRANSLATOR'S COURSE
PART 1

# WEEK TWO

Sanskrit: The Translator's Course, Part 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Fall Term, Class Schedule

**WEEK ONE: Thursday, Oct. 16, 2008, 1:00 – 4:00 PM**

A. Quiz
B. Review of homework

**HOMEWORK:**

**1.** Provide a word by word English translation of Chapter 1, verses 51-75 of Arya Nagarjuna's **रत्नावली**

## रत्नावली

निरोधं च प्रपञ्चोत्थं याथाभूत्यादुपागतः।
नोपयात्यस्तितां तस्मान्मुच्यतेऽद्वयनिश्चितः॥५१॥

दूरादालोकितं रूपमासन्नैर्दृश्यते स्फुटम्।
मरीचिर्यदि वारि स्यादासन्नैः किं न दृश्यते॥५२॥

दूरीभूतैर्यथाभूतो लोकोऽयं दृशयते तथा।
न दृश्यते तदासन्नैरनिमित्तो मरीचिवत्॥५३॥

[मरीचिस्तोयसदृशी यथा नाम्बु न] चार्थतः।
स्कन्धास्तथात्मसदृशा नात्मानो नापि तेऽर्थतः॥५४॥

मरीचीं तोयमित्येतदिति मत्वागतोऽत्र सन्।
यदि नास्तीति तत्तोयं [गृण्हीयान्मूढ एव सः॥५५॥

मरीचिप्रतिमं लोकमेवमस्तीति गृण्हतः।
नास्तीति चापि मोहोऽयं सति मोहे न मुच्यते॥५६॥

नास्तिको दुर्गतिं यातिं सुगतिं यति चास्तिकः।
यथाभूतपरिज्ञानान्मोक्षमद्वयनिश्रितः॥५७॥

अनिच्छन् नास्तितास्तित्वे यथाभूतपरिज्ञया।
नास्तितां लभते मोहात् कस्मान्न लभतेऽस्तिताम्॥५८॥

स्यादस्तिदूषणादस्य नास्तितात्क्षिप्यतेऽर्थतः।
नास्तितादूषणादेव कस्मान्नाक्षिप्यतेऽस्तिता॥५९॥

न प्रतिज्ञा न चरितं न चित्तं बोधिनिश्रयात्।
नास्तिकत्वेऽर्थतो येषां कथं ते नास्तिकाः स्मृताः॥६०॥

ससांख्यौलूक्यनिर्ग्रन्थपुग्दलस्कन्धवादिनम्।
पृच्छ लोकं यदि वदत्यस्तिनास्तिव्यतिक्रमम्॥६१॥

धर्मयौतकमित्यस्मान्नास्त्यस्तित्वव्यतिक्रमम्।
विद्धि गम्भीरमित्युक्तं बुद्धानां शासनामृतम्॥६२॥

विभवं नैति नायाति न तिष्ठत्यपि च क्षणम्।
त्रैकाल्यव्यतिवृत्तात्मा लोक एव कुतोऽर्थतः॥६३॥

द्वयोरप्यागतिगती प्रस्थितिश्च न तत्त्वतः।
लोकनिर्याणयोस्तस्माद्विशेषः क इवार्थतः॥६४॥

स्थितेरभावादुदयो निरोधश्च न तत्त्वतः।
उदितश्च स्थितश्चेति निरुद्धश्च कुतोऽर्थतः॥ ६५॥

कथमक्षणिको भावः परिणामः सदा यदि।
नास्ति चेत्परिणामः स्यादन्यथात्वं कुतोऽर्थतः॥ ६६ ॥

एकदेशे क्षयाद्वा स्यात् क्षणिकं सर्वशोऽपि वा।
वैषम्यानुपलब्धेश्च द्विधाप्येतदयुक्तिमत्॥ ६७॥

क्षणिके सर्वथा भावे कुतः काचित्पुराणता।
स्थैर्यादक्षणिके चापि कुतः काचित्पुराणता॥ ६८॥

यथान्तोऽस्ति क्षणस्यैवमादिर्मध्यं च कल्प्यताम्।
त्र्यात्मकत्वात् क्षणस्यैवं न लोकस्य क्षणं स्थितिः॥ ६९॥

आदिमध्यावसानानि [चिन्त्यानि क्षणवत्पुनः।
आदिमध्या] वसानत्वं न स्वतः परतोऽपि वा॥ ७०॥

नैकोऽनेकप्रदेशत्वान्नाप्रदेशश्च कश्चन्।

विनैकमपि नानेको नास्तित्वमपि चास्तिताम्॥ ७१॥

विनाशात् प्रतिपक्षाद्वा स्यादस्तित्वस्य नास्तिता।

विनाशः प्रतिपक्षो वा कथं स्यादस्त्यसंभवात्॥ ७२॥

निर्वृतेस्तेन लोकस्य नोपैत्यूनत्वमर्थतः।

अन्तवानिति लोकश्च पृष्टस्तूष्णीं जिनोऽभवत्॥ ७३॥

सर्वज्ञ इति सर्वज्ञो बुधैस्तेनैव गम्यते।

येनैतद्धर्मगाम्भीर्यं नोवाचाभजने लोके॥ ७४॥

इति नैःश्रेयसो धर्मो गम्भीरो निष्परिग्रहः।

अनालय इति प्रोक्तः संबुद्धैस्तत्वदर्शिभिः॥ ७५॥